
# ॥ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ॥



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 23/05/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 24/05/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 25/07/2012 | **First Proof Reading** | **Venugopal M S** |
| 4 | 25/07/2012 | **First proof Correction** | **H K Srinivasa Rao** |
| 5 | 08/03/2017 | **2nd Proof Correction** | **H K Srinivasa Rao & Sandesh Kamath** |

# ॥ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, wesolicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care.We would be pleased to incorporate such corrections in the next versions.Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ,ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ: ಆಚಾರ್ಯ ಪ್ರಭಂಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲಗ್ರಂಥಗಳು, ಮತ್ತು 'ಅಖಿಲ ಭಾರತ ಮಾಧ್ವಮಹಾ ಮಂಡಲ'ದಿಂದ ಪ್ರಕಾಶಿತವಾದ ಉಪನಿಷತ್ಪ್ರಸ್ಥಾನ.

॥ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ॥ .................................................. 1

॥ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ................................ 2

अथ प्रथमः प्रश्नः ॥1॥ ................................................................................ 4

अथ द्वितीयः प्रश्नः ॥2॥ ................................................................................ 6

अथ तृतीयः प्रश्नः ॥3॥ ................................................................................ 7

अथ चतुर्थः प्रश्नः ॥4॥ ................................................................................ 8

अथ पञ्चमः प्रश्नः ॥5॥ ................................................................................ 9

अथ षष्ठः प्रश्नः ॥6॥ ................................................................................ 10

॥ षट्प्रश्नोपनिषद्भाष्यम् ॥

## अथ प्रथमः प्रश्नः ॥ 1 ॥

हरिः ओं॥ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चालायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः। ते ह्येते ब्रह्मपरा ब्रह्मनिष्ठाः परम्ब्रह्मान्वेषमाणाः। एष हे वै तत् सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः॥ 1 ॥

नमो भगवते तस्मै प्राणादिप्रभविष्णवे।

अमन्दानन्दसान्द्राय वासुदेवाय वेधसे॥

तान् ह स ऋषिरुवाच। भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ। यथाकामं प्रश्नान् पृच्छत। यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति॥ 2 ॥

अथकबन्धी कात्यायन उपेत्य पप्रच्छ। भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति। तस्मै स होवाच प्रजाकामो ह वै प्रजापतिः। स तपोऽतप्यत॥ 3 ॥

भा – प्रजानां पालनाद्विष्णुः प्रजापतिरितीरितः।

स मिथुनमुत्पादयते। रयिं च प्राणं चेति। एतौ मे बहुधा प्रजाः करिष्यत इति॥ आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः ॥ 4 ॥

स वायुं सूर्यनामानं चन्द्र नाम्नीं सरस्वतीम्।

सूर्याचन्द्रगतौ देवः ससर्ज पुरुषोत्तमः।

तावाविश्य स्वयं विष्णुः सर्वसृष्टीः करोत्यजः॥

रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च। तस्मान्मूर्तिरेव रयिः अथादित्य उदयन् यत्प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते यद् दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते॥ 5 ॥

अमूर्तस्थः स वायुस्तु मूर्तसंस्था सरस्वती।

भा – आदित्यस्थः स वायुस्तु प्राणानात्मनि सन्नयेत्।

प्राच्य प्राणास्तथेन्द्राद्या दक्षिणाश्च यमादयः।

प्रतीच्या वरुणाद्यास्तु सोमाद्या उत्तराः स्मृताः।

शेषमित्राववाचीनौ वीन्द्र कामावुदक्तनौ।

सभार्याः कोणपैः सार्धं चत्वारो दिशि दिश्यपि।

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते॥ तदेतदृचाऽभ्युक्तम्॥

विश्वरूपं करिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्।

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः॥6॥

संवत्सरो वै प्रजापतिः। तस्यायने दक्षिणं चोत्तरं च। तद् ये ह वै तदिष्टापूर्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते त एव पुनरावर्तन्ते। तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष वै रयिर्यः पितृयाणः॥7॥

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानम् अन्विष्याऽऽदित्यमभिजयन्ते। एतद् वै प्राणानामायतनमेतदमृतमभयमेतत्परायणम्। एतस्मान्न पुनरावर्तन्त इत्येष निरोधः। तदेष श्लोकः॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।

अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षळर आहुरर्पितमिति॥8॥

संवत्सरस्थो भगवान् वागीरावयनस्थितौ।

मासो वै प्रजापतिः। तस्य कृष्णपक्ष एव रयिः। शुक्लः प्राणः। तस्मादेते ऋषयः शुक्ल इष्टिं कुर्वन्ति। इतर इतरस्मिन्। अहोरात्रे वै प्रजापतिः। तस्याहरेव प्राणो रात्रिरेव रयिः। वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते। ब्रह्मचर्यमेव तद् यद् रात्रौ रत्या संयुज्यन्ते॥9॥

भा - ‘ मासस्थितः स भगवान् पक्षयोर्वाक् च मारुतः।

अहोरात्रे तु भगवान् प्राणो ह्यहनि वाङ्निशि॥

दम्पत्योर्भगवान् विष्णुर्भार्यास्था तु सरस्वती।

भर्तृस्थः स स्वयं वायुरेवं जानन् विमुच्यते॥’

इति प्रजापतिसंहितायाम्॥

अन्नं वै प्रजापतिस्ततोहवैतद् रेतः। तस्मादिमाः प्रजाः प्रजायन्त इति॥ तद् ये ह वैतत् प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम्। तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति॥

॥इति प्रथम प्रश्नः॥1॥

## अथ द्वितीयः प्रश्नः॥2॥

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजा विधारयन्ते। कतर एतत् प्रकाशयन्ते। कः पुनरेषां वरिष्ठ इति॥1॥

तस्मै स होवाच। आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च। ते प्राकाश्या अभिवदन्ति। वयमेतद् बाणमवष्टभ्य विधारयाम इति॥2॥

भा – वायुरग्निरित्यत्र भूतवायुरुच्यते।

तान् वरिष्ठः प्राण उवाच। मा मोहमापद्यथाहमेवैतत् पञ्चधाऽऽत्मानं विभज्य एतद् बाणमवष्टभ्य प्रविधारयामीति॥तेऽश्रद्धधाना बभूवुः। सोऽभिमानादूर्ध्वं मुत्क्रमत इव। तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रमन्ते। तस्मिंश्चप्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते॥3॥

प्राणशब्देन प्रधानवायुः।

तद्यथा मधुमक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रमन्ते। तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते। एवं वाङ्मनश्चक्षुः श्रोत्रं चेति। ते प्रीताः प्राणं स्तुवन्ति॥एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत्॥4॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।
ऋचो यजूंषि सामानि यज्ञः क्षत्रं च ब्रह्म च॥

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे।
तुभ्यं प्राण प्रजास्त्विमा यत् प्राणैः प्रतितिष्ठसि॥

देवानामसि वह्नितमः पितृणां प्रथमा स्वधा।
ऋषीणां चरितं सत्यमथर्वाऽङ्गिरसामपि॥5॥

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता।
त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः॥

यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः।
आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति॥

व्रात्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः।
वयमद्यस्य दातारः पिता त्वं मातरिश्व नः॥6॥

याते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि।
या मनसि सन्तता शिवां तां कुरु मोत्क्रमीः॥

प्राणस्यैतद्वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम्।
मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति॥7॥

॥इति द्वितीयप्रश्नः॥2॥

## अथ तृतीयः प्रश्नः॥3॥

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ। भगवन् कुत एष प्राणो जायते। कथमायात्यस्मिन् शरीरे। आत्मानं वा प्रविभज्य कथं प्रतिष्ठते॥केनोत्क्रमते। कथं बाह्यमभिधत्ते। कथमध्यात्ममिति॥1॥

तस्मै स होवाचात्प्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि। आत्मत एष प्राणो जायते। यथैषा पुरुषे च्छाया एतस्मिन्नेतदाततं॥2॥

भा – आत्मतः – परमात्मतः।

मनोकृतेनायात्मस्मिंछरीरे। यथा साम्राडेवाधिकृतान् विनियुङ्क्ष एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते ॥3॥

भा - 'विष्णोर्वायुः समुत्पन्नो वायोः सर्वाश्च देवताः।
प्राणाद्यास्तान्नयन् प्राण आज्ञापयति राजवत्।
स्वयं च पञ्चरूपः सन् दद्यान्मोक्षादिकं प्रभुः॥' इति प्रभञ्जने॥

पायूपस्थेऽपानं चक्षुः श्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतिष्ठते। मध्ये तु समानः। एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति। हृदि ह्येष आत्मा॥4॥

अत्रैतदेकशतं नाडीनाम्। तासां शतमेकैकस्यां द्वासप्ततिंप्रतिशाखानाडीसहस्राण्यासु व्यानश्चरति। अथैकयोर्ध्वं उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्॥5॥

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः। पृथिव्यां या देवता सैषा

पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः। तेजो ह वा उदानः। तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः॥6॥

यच्चित्तस्तेनैष प्राणमायाति। प्राणस्तेजसा युक्तः सहात्मना यथासङ्कल्पितं लोकं नयति। य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति। तदेष श्लोकः।

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा।
आध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते॥
विज्ञायामृतमश्नुत इति॥7॥

**॥इति तृतीयः प्रश्नः॥3॥**

## अथ चतुर्थः प्रश्नः॥4॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति। कान्यस्मिन् जाग्रति। कतर एष देवः स्वप्नान् पश्यति। कस्यैतत् सुखं भवति। कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्तीति॥1॥

तस्मै स होवाच। यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वैतत्सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो न श्रुणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते॥2॥

भा- 'रश्मीनामविशेषेऽपि ह्यन्य दृष्टव्यपेक्षया।
सूर्यस्य मण्डलं यान्तीत्युच्यन्ते तददर्शनात्॥

एवं विष्णोस्तु सामीप्याद्देवानां सुप्तिगस्य तु।
व्यवहाराकरत्वाच्चैकीभाव इतीर्यते॥' इति च।

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वा हार्यपचनो यद् गार्हपत्यात् प्रणीयते। प्रणयनादाहवनीयः प्राणः। यदुच्छ्वासनिःश्वासावेतावाहुती समं नयति स समानो मनो ह वाव यजमान इष्टफलमेवोदानः। स एनं यजमानमहरहर्ब्रह्म गमयति॥3॥

अत्रैष देवः स्वप्ने महिमानमनुभवति। यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुश्रुणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति। दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं

चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति। स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान् न पश्यति । अथ यदेतस्मिंछरीरे सुखं भवति॥4॥

भा – भगवतः शरीरवत् सादृश्ययुक्ते जीवे सुखं भवति। कस्यैतत्सुखं भवतीति पृष्टत्वात्। न ह्यचेतनस्य शरीरस्य सुखं भवति। 'यस्यात्मा शरीरम्' इति च श्रुतिः।

'सादृश्याद्देहवज्जीवो विष्णोस्तस्य सुखं भवेत्।
सुप्तौ तस्य सुखार्थं हि भगवान् सुप्तिमानयेत्॥' इति च॥

स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते। एवं ह वैतत्सर्वं परे आत्मनि सम्प्रतिष्ठते। पृथिवी च पृथिवीमात्रा च आपश्च आपोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च। चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसनं च रसयितव्यं च त्वक् च स्पर्शयितव्यं च वाक् च वक्तव्यं च हस्तौ च दातव्यं च पादौ च गन्तव्यं च पायुश्च विसर्जयितव्यं चोपस्थश्चानन्दयितव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च॥5॥

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धाकर्ता विज्ञानात्मा पुरुषः। सपरेऽक्षर आत्मनि सम्प्रतिष्ठते। परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य। स सर्वज्ञः सर्वं भवति। तदेष श्लोकः। विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। तदेतदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति॥6॥

## ॥इति चतुर्थः प्रश्नः॥4॥

## अथ पञ्चमः प्रश्नः॥5॥

अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै भगवान् मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत। कतमं वाव स तेन लोकं जयतीति।

तस्मै स होवाच। एतद्वै सत्यकाम परं चापरं च ब्रह्मयदोङ्कारः। तस्माद्विद्वानेतेनैवायनेनैकतरमन्वेति॥1॥

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते। स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति। अथ यदि

द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम्। स सोमलोके विभूतिमनुभूय पुनरावर्तते। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम्। स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते॥2॥

भा - 'प्रणवेन हरिं ध्यायन् ब्रह्मलोकं समेत्य च।
ज्ञानं चतुर्मुखात् प्राप्य मुच्यते नात्र संशयः'॥

तदेतौ श्लोकौ भवतः। तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः। क्रीयासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः। ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते। तमोङ्कारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं च इति॥3॥

**॥।इति पञ्चमः प्रश्नः॥5॥**

## अथ षष्ठः प्रश्नः॥6॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत। षोडशकलं भारद्वाज पुरुषं वेत्थ तं मह्यं ब्रवीहीति। तमहं कुमारमब्रुवं नाहमिमं वेद। यद्यहमिममवेदिष्यं कथं ते नावक्ष्यमिति। समूलो वा एष परिशुष्यति योऽनृतमभिवदति। तस्मान्नार्हाम्यहमनृतं वक्तुम्। स तूष्णीं रथमारुह्य प्रवव्राज। तं त्वा पृच्छामि क्वासौ पुरुष इति॥1॥

तस्मै स होवाच। इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति। स ईक्षाञ्चक्रे। कस्मिन् न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति। स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः। पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च ॥2॥

भा - 'कर्मेति पुष्करः प्रोक्त उषा नामाभिमानिनी।
लोकाभिमानी पर्जन्यः स्वाहा वै मन्त्र देवता॥

तपोऽभिमानी वह्निश्च वरुणो वीर्यदेवता।
अन्नस्य देवता सोमो मनोनामाऽनिरुद्धकः।

इन्द्रियेशाश्च सूर्याद्याश्चक्षुराद्यभिमानिनः।

रुद्रो वीन्द्रः शेषकामौ मनसस्त्वेव देवताः।

श्रद्धेति वायोः पत्नी स्यात् सर्वेषां प्रभवाप्यया।

तस्याश्च कारणं प्राणः सर्वेषामुत्तमोत्तमः।

तस्यापीशः कारणं च वासुदेवः परोऽव्ययः।

न तस्य सदृशः कश्चित् कुत एवोत्तमो भवेत्।

तं ज्ञात्वा मुच्यते जन्तुर्विदित्वैवं परात्परम्'॥ इति तत्त्वविवेके॥

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥'

इति मन्त्रोक्त एव क्रमः। न हीन्द्रियेभ्यो मनः पश्चात्। 'तत्प्राक् श्रुतेश्च' इति च भगवद्वचनम्॥

'विष्णोः प्राणस्ततः श्रद्धा तस्या रुद्रो मनोभिधः।

तस्मादिन्द्रस्त्विन्द्रियात्मा तस्य सोमोऽन्नदेवता॥

ततश्च वरुणः सृष्टस्तस्मादग्निस्ततोऽवरः।

आकाशदेवता विघ्नस्ततो वायोः सुतो मरुत्॥

तस्मादग्निः पावकाख्यः प्रथमोऽग्नेः सुतस्ततः।

ततः पर्जन्य उद्भूतः स्वाहाऽतो मन्त्रदेवता॥

उदकात्मको बुधस्तस्या उषा नामात्मिका ततः।

ततः शनिः पृथिव्यात्मा कर्मात्मा पुष्करस्ततः।

क्रमात् प्रत्यवरा एते मुक्ताः सर्वगुणैरपि।

नित्यमुक्तस्ततो विष्णुः प्राणादप्युत्तमोत्तमः॥' इति च।

यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति। भिद्येते चासां नामरूपे। पुरुष इत्येवं प्रोच्यते। स एषोऽकलोऽमृतो भवति॥3॥

भा - 'समुद्रे इत्येवं प्रोच्यते। पुरुषे इत्येवं प्रोच्यते। भिद्येते तासां नामरूपे। भिद्येते चासां नामरूपे' इत्युक्तत्वात्। अज्ञैरनवगतान्यपि समुद्रे स्थितानां नदीनां, विष्णौ स्थितानां मुक्तानां च भिन्नान्येव नामरूपाणि सन्त्येवेत्यर्थः।

न च भेदशब्दो नाशे प्रयुज्यमानः क्वचिद् दृष्टः। घटादावपि बहुभाव एव भेदशब्दः प्रयुज्यते। नाशस्त्वर्थत एवावगम्यते। न चात्रर्थतोऽपि नाशोऽवगम्यते। न हि नामानि रूपाणि च कपालवद् बहुधा भूतानि तिष्ठन्ति। अतो भिद्येते इति पृथक्त्वमेवोच्यते। 'अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः' इति वाक्यशेषाच्च। अतः पुरुषे भिन्नानि नामरूपाणि प्रतिष्ठिताःनीत्येवार्थः।

अस्तगमनं त्वादित्यवदज्ञानामविज्ञेयत्वमेव।

'प्राणादयः कला यस्मिन् मुक्ता नित्यं प्रतिष्ठिताः।

पृथक् पृथक् नामरूपैर्नमस्तस्मै पराय ते॥' इति सत्तत्त्वे॥

'नामरूपाद्विमुक्तः' इत्यनेनापि नामरूपामुक्तत्वमुच्यते। विप्रिय इत्यादिवत्। नामरूपे आविहार्येति च पूर्वत्र। 'अनन्तं वै नामानन्ता वै विश्वेदेवाः' इति नामरूपयोरनन्तत्वं हि श्रुतिर्वक्ति।

'यत्र पूर्वे साध्याः सन्ति देवाः'

'स तत्र पर्यैति जक्षन् क्रीडन्नममाणः'

'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'

'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु'

इत्यादेश्च। अतः सर्वमुक्तेभ्योऽप्युत्तमोत्तमः परिपूर्णो नारायण इति सिद्धम्॥3॥

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः।

तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति॥

तान् होवाच। एतावदेवाहमेतत् परं ब्रह्मवेद नातः परमस्तीति। ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति। नमः परमऋषिभ्यो नमः परमऋषिभ्यः॥8॥

॥इति षष्ठः प्रश्नः॥6॥

## ॥इति षट् प्रश्नोपनिषत् समाप्ता॥

भा – नमो नमोऽस्तु हरये प्रेष्ठप्रेष्ठतमाय मे।

परमानन्दसन्दोहसान्द्रानन्दवपुष्मते॥

## ॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं षट् प्रश्नोपनिषद्भाष्यम्॥